# कथापात्रनिरूपणम् - कण्वः

महाकविकालिदासेन विरचितं विश्वप्रसिद्धं नाटकं भवति अभिज्ञानशाकुन्तलम्। सप्ताङ्कसहितस्य अस्य नाटकस्य चतुर्थोऽङ्के प्रधानपात्रं भवति कण्वमहर्षिः। शकुन्तलायाः पतिगृहगमनवेलायां दुष्यन्तं प्रति शार्ङ्गरवसकाशं सकलकालप्रसक्तमेकं सन्देशं प्रेषयति कण्वः। एवं च शकुन्तलांप्रति पतिगृहे सपत्नीभ्यो, परिचारकेभ्यो च कथं आचरणीयमिति शुश्रूषस्व. . . इत्यस्मिन् श्लोके कण्वः परिपक्वमुपदेशं ददाति।

एतदुपदेशः अधुनापि प्रसक्तमिति मन्यते प्राज्ञैः। एतावत्कालं स्नेहमनुभूय उषितमाश्रमं कदा भूयोऽपि प्रेक्षिष्ये इति शकुन्तलायाः आशङ्काम् दूरीकृत्य वर्षेभ्यः परं समर्थं पुत्रं राज्यभारं निक्षिप्य भर्त्रा दुष्यन्तेन सह पुनरपि प्रविश इति अनुग्रहति महर्षिः। वचनमिदं कुटुम्बभद्रतां सम्यग् जानतः कण्वस्य सदुपदेश एव। अन्ते शिवास्ते सन्तु पन्थानः इत्याशिषा पुत्रीं भर्तृगृहं प्रेषमाणः कण्वः उत्तमगृहस्थस्य निदर्शनः लोकज्ञ एवेति वक्तुं शक्यते।